**Bachelor of Arts (B.A.) Part–I First Semester Examination**

**SANSKRIT**

**Compulsory Paper—1 (Other Language)**

समय: — होरात्रयम् ] [ पूर्णांका: — 80

**निर्देश:–** स्वीकृत माध्यमेन उत्तराणि लिखत ।

1. गद्यानुवादं कुरुत : 5

सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रभद: । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सी: । सत्यान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यम् । ये के चास्मच्छ्रेयांसो ब्राह्मणा: तेषा त्वया आसनेन प्रश्वसितव्यम् ।

**अथवा**

बाल: - जृम्भस्व सिंह, दन्तास्ते गणयिष्ये ।

प्रथमा - अविनीत, किं नोऽपत्यनिर्विशेषाणि ते विप्रकरोषि ? हन्त, बर्धते तव संरम्भ: । स्थाने खलु ऋषिजनेन 'सर्वदमन' इति कृतनामधेयोऽसि ।

राजा - किं नु खलु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति में मन: ?

नूनम् अनपत्यता मां वत्सलयति ।

2. पद्यानुवादं कुरुत : 5

तव राज्यं नरव्याघ्र मम प्रव्राजनं तथा ।
तौ च राजा तदा तस्यै नियुक्त: प्रददौ वरौ ।।
लक्ष्मीश्चन्द्रादपेयाद्वा हिमवान् वा हिमं त्यजेत् ।
अतीयात्सागरो वेळां न प्रतिज्ञामहं पितु: ।।

**अथवा**

यस्यस्ति वित्तं स नर: कुलीन: ।
स पण्डित: स श्रुतवान् गुणज्ञ:
स एव वक्ता स च दर्शनीय: ।
सर्वे गुणा: काञ्चनमाश्रयन्ते ।।

3. ससन्दर्भं स्पष्टीकरणं लिखत : 5

(अ) श्रद्धया देयम् ।

**अथवा**

अहो निर्दयता दुरात्मनां पौराणाम् ।

(ब) विद्याविहीन: पशु: । 5

**अथवा**

मृता: प्रक्ष्यन्ति कं पुन: ।

4. 'इन्द्रियकथा' पाठस्याधारेण प्राणस्य श्रेष्ठत्वं लिखत । 10

**अथवा**

'सहाय: क्षेमकारक:' इति कथां स्वशब्दै: लिखत ।

5. 'चित्तैकाग्र्यम्' कथां स्वशब्दै: लिखत । 10

**अथवा**

कौत्स: गुरुदक्षिणार्थं धनं कथं प्राप्तवान् इति 'कौत्सस्य गुर्वर्थप्राप्ति:' इति पाठस्याधारेण लिखत ।

6. निम्नलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत : 5

एकस्मिन् नगरे कोऽपि विप्रो महाविद्वान् परं पूर्वजन्मयोगेन चोरोऽवर्तत । तस्मिन् पुरेऽन्यदेशात् आगतांश्चतुरो विप्रान् बहुनि वस्तुनि विक्रीणतो दृष्ट्वा चिन्तितवान् । अहो केनोपायेनैषां धनं लभे ? इति विचिन्त्य तेषां पुरोऽनेकानि शास्त्रोक्तानि सुभाषितानी चातिप्रियाणि मधुराणि वचनानि जल्पता तेन तेषां मनसि विश्वासमुत्पाद्य सेवा कर्तुमारब्धा ।

(१) एकस्मिन् नगरे क: चोर: अवर्तत ?

(२) चोरविप्र: किं दृष्ट्वा चिन्तितवान् ?

(३) चोरविप्र: किं व्यचिन्तयत् ?

(४) चोरविप्रेण चतुर्णां विप्राणां सेवा कथं कर्तुमारब्धा ?

(५) प्रस्तुत: गद्यांश: कस्मात् पाठात् उद्धृत: ?

7. निम्नलिखितं पद्यं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत :- 5

खल्वाटो दिवसेश्वरस्य किरणै: सन्तापितो मस्तके ।

वाञ्छन् देशमनातपं विधिवशात् तालस्य मूलं गत:

835 835 835 835 835

तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः
प्रायो गच्छति यत्र भाग्यरहितस्तत्रापदां भाजनम् ।।

(१) कः दिवसेश्वरस्य किरणैः सन्तापितः ?

(२) विधिवशात् सः कस्य मूलं गतः ?

(३) तस्य शिरः केन भग्नम् ?

(४) यत्र भाग्यरहितः गच्छति तत्र किं भवति ?

(५) अयं पद्यांशः कस्मात् पाठात् उद्धृतः ?

8. उचितैः पर्यायैः रिक्तस्थानानि पूरयत : 5

(१) रामायणे .................... काण्डानि सन्ति । (सप्त, अष्ट, नव)

(२) महाभारते ................... पर्वाणि सन्ति । (षोडश, सप्तदश, अष्टादश)

(३) कविकुलगुरुकालिदासः इतिखण्डकाव्यं रचितवान् । (नीतिशतकम् गीतगोविन्दम्, मेघदूतम्)

(४) अष्टांगहृदयस्य कर्ता .............. । (चरकः, सुश्रुतः, वाग्भटः)

(५) अश्वघोषकविना । इति महाकाव्यं लिखितम् । (विवेकानन्दचरितम्, उत्तररामचरितम्, बुद्धचरितम्)

9. द्वयोः स्तम्भयोः मेलनं कुरुत : 5

| **स्तम्भः — (अ)** | **स्तम्भः — (ब)** |
|---|---|
| (१) इन्द्रियकथा | (अ) अभिज्ञानशाकुन्तलम् |
| (२) कौत्सस्य गुर्वर्थप्राप्तिः | (ब) उपनिषद् |
| (३) कुमारलवस्य वीरसावेशः | (क) नीलकण्ठ दीक्षितः |
| (४) कलिविडम्बनम् | (ड) उत्तररामचरितम् |
| (५) पितृपुत्रमेलनम् | (ई) रघुवंशम् । |

10. टिप्पणीः लिखत : 20

(१) वाल्मीकिः (२) कालिदासः

(३) चरकः (४) सुश्रुतः

835 835 835 835 835